विद्याऽमृतमश्नुते

# PRINCE SCHOOL

Rajasthan Board, English & Hindi Medium, Class IV to XII (Science, Commerce, Arts & Agriculture)

www.princeeduhub.com | Palwas Road, Sikar. Helpline : 9610-69-2222 | princeeducationhubsikar

## Model Question Paper - I, 2025-26

## Class - X

**Time : 3:15 Hours** | **Subject:- Sanskrit** | **M.M. : 80**

***GENERAL INSTRUCTIONS TO THE EXAMINEES:***
***परीक्षार्थियों के लिए सामान्य निर्देश:***

- *Candidate must write first his/her Roll No. on the question paper compulsory.*
  *परीक्षार्थी सर्वप्रथम अपने प्रश्न पत्र पर नामांक अनिवार्यतः लिखें।*
- *All the questions are compulsorily.*
  *सभी प्रश्न हल करने अनिवार्य हैं।*
- *Write the answer to each question in the given answer-book only.*
  *प्रत्येक प्रश्न का उत्तर दी गई उत्तर-पुस्तिका में ही लिखें।*
- *For questions having more than one part, the answers to those parts are to be written together in continuity.*
  *जिन प्रश्नों मे आन्तरिक खण्ड है, उन सभी के उत्तर एक साथ ही लिखें।*
- *Write down the serial number of the question before attempting it.*
  *प्रश्न का उत्तर लिखने से पूर्व प्रश्न का क्रमांक अवश्य लिखें।*

## खण्ड - ''अ''

**01. वस्तुनिष्ठप्रश्ना :-** **[18×1=18]**

(i) सरसः शोभा केन भवति?

(अ) बकेन (ब) गजेन (स) मकरेण (द) राजहंसेन [ ]

(ii) वानरः कस्य पुच्छं धुनाति?

(अ) पिकस्य (ब) काकस्य (स) सिंहस्य (द) मयूरस्य [ ]

(iii) कस्मिन् सुते मातुः अधिका कृपा भवति?

(अ) सुन्दरे सुते (ब) दुर्बले सुते (स) बलिष्ठे सुते (द) कनिष्ठे सुते [ ]

(iv) लोकेऽस्मिन् चक्षुष्मन्तः के प्रकीर्तिताः?

(अ) नृपाः (ब) विद्वांसः (स) धनिकाः (द) युवकाः [ ]

(v) कस्य समक्षमद्यापि मानवः वामनकल्प एव?

(अ) भूकम्पस्य (ब) समुद्रस्य (स) भगवतः (द) प्रकृतेः [ ]

(vi) लवकुशयोः वंशस्य कर्त्ता कः?

(अ) हरिश्चन्द्रः (ब) वशिष्ठः (स) सूर्यः (द) वाल्मीकिः [ ]

(vii) "करी च सिंहस्य बलं वेत्ति।" रेखाङ्कितपदस्य प्रसङ्गानुसारं कोऽर्थः?

(अ) गजः (ब) मूषकः (स) चित्रकः (द) अश्वः [ ]

(viii) "अहं वन्यपशून् पोथयित्वा मारयिष्यामि।" रेखाङ्कितपदस्य प्रसङ्गानुसारं कोऽर्थः?

(अ) दृष्ट्वा (ब) पीत्वा (स) पीडयित्वा (द) आकर्ष्य [ ]

(ix) 'गावश्च' इत्यस्य सन्धिविच्छेदोऽस्ति–

(अ) गौ + अवश्च (ब) गाव + श्च (स) गावश् + च (द) गावः + च [ ]

(x) 'विनै + अकः' इत्यस्य सन्धिपदं भवति–

(अ) विनयकः (ब) विनायकः (स) विनयाकः (द) विनैयकः [ ]

(xi) जश्त्वसन्धेः उदाहरणमस्ति–

(अ) दिग्गजः (ब) विष्णुः (स) उत्पन्नः (द) भुजनगरं तु [ ]

(xii) 'अधिहरि' इति पदे कः समासः?

(अ) तत्पुरुषः (ब) अव्ययीभावः (स) द्वन्द्वः (द) बहुव्रीहिः [ ]

(xiii) 'अधः' शब्दयोगे का विभक्तिः भवति?

(अ) तृतीया (ब) पञ्चमी (स) षष्ठी (द) द्वितीया [ ]

(xiv) 'वृञ्' धातोः योगे का विभक्तिः भवति?

(अ) तृतीया (ब) चतुर्थी (स) पञ्चमी (द) षष्ठी [ ]

(xv) 'उपान्वध्याङ्वसः' इत्यत्र का विभक्तिः भवति?

(अ) द्वितीया (ब) तृतीया (स) चतुर्थी (द) पञ्चमी [ ]

(xvi) तेन श्लोकाः ................। अत्र पूरणीयं समुचितपदं किम्?

(अ) गीयते (ब) गीयेते (स) गीयन्ते (द) गीयसे [ ]

(xvii) अहं रात्रौ (8:45) .............वादने भोजनं करोमि। अत्र समुचितं समयवाचकं शब्दं किम्?

(अ) पादोन अष्ट (ब) पादोन नव (स) सपाद अष्ट (द) सार्ध अष्ट [ ]

(xviii) "अयोग्यौ पुरुषः नास्ति" रेखाङ्कितपदस्य शुद्धरुपं किम्?

(अ) अयोग्याः (ब) अयोग्यम् (स) अयोग्येन (द) अयोग्यः [ ]

**02. निर्देशानुसारं रिक्तस्थानानि पूरयत-** **[1×6=6]**

(i) ...................................... बालिका विद्यालयम् आगच्छति। (धाव् + शतृ)

(ii) नगरे ........................................वसति। (जन + तल्)

(iii) तस्याः बालिकायाः नाम ..................................अस्ति। (दीपक + टाप्)

(iv) भूकम्पित-समये ...........................................गमनमेव उचितं भवति। (उपरि, बहिः, अन्तः)

(v) परिश्रमं ...................................सुखं नास्ति। (एव, अपि, विना)

(vi) पिपीलिका ..............................चलति। (तदा, शनैः, एव)

**03. अधोलिखितं गद्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत -**

भारतवर्षः एकः महान् देशः वर्तते। अस्मिन् अनेके प्रदेशाः सन्ति। तेषु साम्प्रतं राजस्थान प्रदेशः एकं राज्यं वर्तते। अस्य राजधानी जयपुरम् अस्ति। राजस्थान प्रदेशस्य काश्चन एतादृश्यः विशेषताः सन्ति याः खलु अन्यत्र न लभन्ते। अस्य प्रदेशस्य भूमिः वीराणां वीराङ्गनानां च जननी वर्तते। अत्र महाराणा प्रतापः, महाराणा सांगा, वीरवरदुर्गादाससदृशाः वीराः समुत्पन्नाः। अत्रैव पद्मिनी, पन्ना सदृश्यः वीराङ्गना समुत्पन्नाः। अद्यापि राजस्थानस्य अनेके वीराः देशसेवायां तत्पराः वर्तन्ते। अयं प्रदेशः न केवलं वीराणां भूमिः अपितु विदूषां जन्मस्थली कार्यस्थली च वर्तते। अत्र अनेके विद्वांसः काले-काले समुत्पन्नाः। राजस्थानस्य राजधानी जयपुरं तु लघुकाशी मन्यते। अत्र संस्कृतस्य अनेके विद्वांसः अभवन्। राजस्थानप्रदेशे अनेकानि दर्शनीय-स्थलानि सन्ति। प्राकृतिक सौन्दर्य दृष्ट्यापि प्रदेशोऽयं सुरम्यः वर्तते। अत्र जयपुर-उदयपुर-अजमेर-भरतपुरादयः विभिन्न-नगराणि-विश्वप्रसिद्धानि सन्ति। बहवः पर्यटकाः अत्र भ्रमणार्थम् आगच्छन्ति।

**(i) एकपदेन उत्तरत -** **[1×2=2]**

(क) कस्य प्रदेशस्य राजधानी जयपुरं वर्तते?

(ख) कं लघुकाशी मन्यते?

**(ii) पूर्णवाक्येन उत्तरत -** **[2]**

(क) राजस्थानस्य भूमिः केषां जननी वर्तते? तस्य अनेके वीराः कुत्र तत्पराः सन्ति?

**(iii) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत।** **[1]**

**(iv) भाषिककार्यम्-** **[1×3=3]**

(क) 'पर्यटकाः' इति कर्तृपदस्य गद्यांशे क्रियापदं किम् अस्ति?

(ख) 'विद्वांसः' इति विशेष्यपदस्य गद्यांशे विशेषणपदं किं प्रयुक्तम्?

(ग) ''अस्मिन् अनेके प्रदेशाः सन्ति।'' इत्यत्र 'अस्मिन्' सर्वनामपदस्थाने संज्ञापदं लिखत।

## खण्ड - ''ब''

**04. अधोलिखितयोः वाक्ययोः अंकानां स्थाने संस्कृतशब्देषु समयलेखनं करणीयम्-** **[1×2=2]**

(क) मम जनकः (10:15) .........................................वादने जयपुरं गमिष्यति।

(ख) ते बालकाः (8:30) ........................................वादने भ्रमणाय गच्छन्ति।

**05.** ''पर्वताः रमणीयानि सन्ति।'' इति वाक्यं संशोधयत। **[2]**

**06.** 'भक्तः रामायणं शृणोति।' इति वाक्यस्य वाच्यपरिवर्तनं कृत्वा लिखत। **[2]**

**07.** 'पीताम्बरम्' इति पदस्य विग्रहं कृत्वा समासस्य नामापि लिखत। **[2]**

**08. अधोलिखितश्लोकस्य हिन्दीभाषायां सप्रसङ्गं भावार्थं लिखत-** **[2]**

विचित्रे खलु संसारे नास्ति किञ्चिन्निरर्थकम्।

अश्वश्चेद् धावने वीरः भारस्य वहने खरः।।

**09. अधोलिखितश्लोकस्य अन्वयं मञ्जूषातः पदानि चित्वा पूरयत-** **[2]**

अवक्रता यथा चित्ते तथा वाचि भवेत् यदि।

तदेवाहुः महात्मानः समत्वमिति तथ्यतः।।

**अन्वयः**- यथा (i)......................चित्ते तथा यदि (ii)........................भवेत् (iii).....................तथ्यतः तदेव, (iv)..................इति आहुः।

(वाचि, अवक्रता, समत्वम्, महात्मानः)

## खण्ड - ''स''

**10. अधोलिखितवाक्येषु रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत-** **[1×3=3]**

(क) उद्याने पक्षिणां कलरवं चेतः प्रसादयति।

(ख) पुत्रं द्रष्टुं सः प्रस्थितः।

(ग) करुणापरो गृही तस्मै आश्रयं प्रायच्छत्।

**11. 'जननी तुल्यवत्सला' इति पाठस्य सारं हिन्दीभाषायां लिखत।** **[3]**

अथवा

**'भूकम्प विभीषिका' इति पाठस्य सारं हिन्दीभाषायां लिखत।**

**12. अधोलिखितं गद्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत ।**

न्यायाधीशेन पुनस्तौ घटनायाः विषये वक्तुमादिष्टौ। आरक्षिणि निजपक्षं प्रस्तुतवति आश्चर्यमघटत्। स शवः प्रावारकमपसार्य न्यायाधीशम् अभिवाद्य निवेदितवान् - मान्यवर! एतेन आरक्षिणा अध्वनि यदुक्तं तद् वर्णयामि त्वयाऽहं चोरितायाः मञ्जूषायाः गृहणाद् वारितः, अतः निज कृत्यस्य फलं भुङ्क्ष्व। अस्मिन् चौर्याभियोगे त्वं वर्षत्रयस्य कारादण्डं लप्स्यसे इति। न्यायाधीशः आरक्षिणे कारादण्डमादिश्य तं जनं ससम्मानं मुक्तवान्।

**(i) एकपदेन उत्तरत -** **[1]**

केन पुनस्तौ घटनायाः विषये वक्तुमादिष्टौ?

**(ii) पूर्णवाक्येन उत्तरत -** **[2]**

सर्वमवगम्य न्यायाधीशः किं कृतवान्?

**(iii) भाषिककार्यम् -** **[1×2=2]**

(क) ''त्वयाऽहं चोरितायाः ........................'' अत्र 'त्वया' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(ख) 'चोरितायाः मञ्जूषायाः' इत्यनयोः पदयोः विशेष्यपदं किम्?

**अथवा**

अस्ति देउलाख्यो ग्रामः। तत्र राजसिंहः नाम राजपुत्रः वसति स्म। एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्र द्वयोपेता पितुर्गृहं प्रति चलिता। मार्गे गहनकानने सा एकं व्याघ्रं ददर्श। सा व्याघ्रमागच्छन्तं दृष्ट्वा धाष्ट्र्यात् पुत्रौ चपेटया प्रहृत्य जगाद- ''कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथः? अयमेकस्तावद्विभज्य भुज्यताम्। पश्चात् अन्यो द्वितीयः कश्चिल्लक्ष्यते।''

**(i) एकपदेन उत्तरत -** **[1]**

(क) राजसिंहः कुत्र वसति स्म?

**(ii) पूर्णवाक्येन उत्तरत -** **[2]**

(क) बुद्धिमती पुत्रौ चपेटया प्रहृत्य किं जगाद?

**(iii) भाषिककार्यम् -** **[1×2=2]**

(क) 'तस्य भार्या पितुर्गृहं प्रति चलिता' अत्र 'तस्य' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(ख) 'ददर्श' इति क्रियापदस्य कर्तृपदं किम्?

**13. अधोलिखितं पद्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत-**

कज्जलमलिनं धूमं मुञ्चति शतशकटीयानम्।

वाष्पयानमाला संधावति वितरन्ती ध्वानम्।।

यानानां पङ्क्तयो ह्यनन्ताः कठिनं संसरणम्। शुचि पर्यावरणम्।।

**(i) एकपदेन उत्तरत -** **[1]**

(क) केषाम् अनन्ताः पङ्क्तयः सन्ति?

**(ii) पूर्णवाक्येन उत्तरत -** **[2]**

(ख) शतशकटीयानं कीदृशं धूमं मुञ्चति?

**(iii) भाषिककार्यम् -** **[1×2=2]**

(क) 'कज्जलमलिनं धूमम्' अनयोः पदयोः किं विशेष्यपदम्?

(ख) 'वाष्पयानमाला' इति कर्तृपदस्य किं क्रियापदं प्रयुक्तम्?

**अथवा**

**आश्वास्य पर्वतकुलं तपनोष्णतप्त-**

मुद्दामदावविधुराणि च काननानि।

नानानदीनदशतानि च पूरयित्वा

रिक्तोऽसि यज्जलद! सैव तवोत्तमा श्रीः।।

**(i) एकपदेन उत्तरत -** **[1]**

(क) तपनोष्णतप्तं किम् अस्ति?

**(ii) पूर्णवाक्येन उत्तरत -** **[2]**

(क) जलदः कीदृशानि काननानि आश्वास्य रिक्तो भवति?

**(iii) भाषिककार्यम् -** **[1×2=2]**

(क) 'तव' इति सर्वनामपदं पद्यांशे कस्मै प्रयुक्तम्?

(ख) 'मेघः' इति पदस्य पद्यांशे किं पर्यायपदं प्रयुक्तम्?

**14. अधोलिखितं नाट्यांशं पठित्वा एतदाधारिततप्रश्नानाम् उत्तराणि यथानिर्देशं लिखत -**

काकः - रे परभृत! अहं यदि तव सन्ततिं न पालयामि तर्हि कुत्र स्युः पिकाः? अतः अहम् एव करुणापरः पक्षिसम्राट् काकः।

गजः - समीपतः एवागच्छन् अरे! अरे! सर्वां वार्तां श्रृण्वन्नेवाहम् अत्रागच्छम्। अहं विशालकायः बलशाली पराक्रमी च। सिंहं वा स्यात् अथवा अन्यः कोऽपि वन्यपशून् तु तुदन्तं जन्तुमहं स्वशुण्डेन पोथयित्वा मारयिष्यामि। किमन्यः कोऽप्यस्ति एतादृशः पराक्रमी। अतः अहमेव योग्यः वनराजपदाय।

**(i) एकपदेन उत्तरत -** **[1]**

(क) काक: कस्य सन्ततिं पालयति?

**(ii) पूर्णवाक्येन उत्तरत -** **[2]**

(क) गज: कीदृश: अस्ति?

**(iii) भाषिककार्यम् -** **[2]**

(क) 'अहम् एव करुणापर:।' अत्र 'अहम्' सर्वनामपदं कस्मै प्रयुक्तम्?

(ख) 'आगच्छम्' इति क्रियापदस्य कर्तृपदं किम्?

**अथवा**

राम: - अहमत्र भवतो: जनकं नामतो वेदितुमिच्छामि।

लव: - न हि जानाम्यस्य नामधेयम्। न कश्चिदस्मिन् तपोवने तस्य नाम व्यवहरति।

राम: - अहो माहात्म्यम्।

कुश: - जानाम्यहं तस्य नामधेयम्।

राम: - कथ्यताम्।

कुश: - निरनुक्रोशो नाम..................

**(i) एकपदेन उत्तरत -** **[1]**

(क) क: लवकुशयो: जनकं नाम वेदितुमिच्छति?

**(ii) पूर्णवाक्येन उत्तरत -** **[2]**

(क) कुश: स्वपितु: नाम किं वदति?

**(iii) भाषिककार्यम् -** **[2]**

(क) 'अहमत्र भवतो: ................................। अत्र 'अहम्' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(ख) 'अस्मिन् तपोवने तस्य नाम व्यवहरति।' इत्यत्र विशेष्यपदं किम्?

## खण्ड - ''द''

**15.** भवान् राजकीय-उच्च-माध्यमिक-विद्यालयस्य दशम्या: कक्षाया: छात्र: प्रवीणोऽस्ति। स्वकीयं प्रधानाचार्यं प्रति दिनद्वयस्य अवकाशार्थम् एकं प्रार्थनापत्रं लिखतु। **[4]**

**अथवा**

परीक्षायां सफलतायै स्वमित्रं प्रदीपकुमारं प्रति अधोलिखितमपूर्णं वर्धापन्नपत्रं मञ्जूषायां प्रदत्तपदसहायतया पूरयित्वा पुनः उत्तरपुस्तिकायां लिखत।

(सुहृदवर्य, प्रणामं, जयपुरतः, कुशलं, वर्धापन्नं, एवमेव, परीक्षायाम्, अधिगतवान्।)

(i) ..........................

दिनाङ्कः 05.01.2026

अभिन्नहृदय(ii)...................।

सप्रेम नमस्ते।

अत्र (iii) ....................... तत्रास्तु। अद्यैव तव पत्रं प्राप्तम्। त्वं प्रथम – श्रेण्यां (iv) .................. उत्तीर्य योग्यता सूच्यां प्रथमं स्थानम् (v)............ इति पठित्वा हर्षमनुभवामि। तव प्रयासः सर्वथा साधुवादार्हः। मम (vi) ......................... स्वीकरोतु। आशासे अग्रेऽपि (vii).............. स्तुत्यप्रयासं करिष्यति। स्वपितृभ्यां मम(viii) .......................... निवेदय।

तव स्निग्धं मित्रम्

हरीशः

**16.** अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया संस्कृतेन अष्टवाक्यानि ''उद्यानं विषये'' लिखत – **[4]**



(उपवनम्, पुष्पाणि, दोलाधिरोहणम्, खगाः, आकाशे, राजमार्गः, बालकाः, भ्रमन्ति)

अथवा

**मञ्जूषायाः- उपयुक्तपदानि गृहीत्वा पितापुत्रयोः मध्ये योगदिवसविषये वार्तालापं पूरयतु-**

(कुर्वन्ति, आगच्छ, जूनमासस्य, कार्यक्रमाः, शक्नोमि, अस्माकम्, योगदिवसे, अन्ताराष्ट्रिययोगदिवसः।)

पुत्रः- भोः पितः! (i) ...............................21 दिनांके कः दिवसः भवति?

पिताः- अरे! तस्मिन् दिने तु (ii) ...................भवति।

पुत्रः- योगदिवसे के (iii) ......................... भवन्ति?

पिताः- (iv) ...................विश्वेजनाः प्राणायामं व्यायामं च कुर्वन्ति।

पुत्रः- योगेन (v) .......................स्वास्थ्यं सम्यक् भवति वा?

पिताः- आम्। ये योगं (vi) .....................ते रुग्णाः न भवन्ति।

पुत्रः- तर्हि अहम् अपि योगं कर्तुं (vii) .........................वा?

पिताः- किमर्थं न, (viii) .............................आवां योगं करवाव।

**17. अधोलिखितेषु वाक्येषु केषाञ्चन चतुर्णां वाक्यानां संस्कृतभाषया अनुवादं करोतु ।** **[4]**

(i) बालक घर की ओर जा रहे हैं।

(ii) रमेश शेर से डरता है।

(iii) पिता पुत्र पर क्रोध करता है।

(iv) सदा सत्य बोलो।

(v) सीता पुष्प सूँघती है।

(vi) तुम्हें वहाँ रहना चाहिये।

**19. अधोलिखितानि वाक्यानि क्रमरहितानि सन्ति। यथाक्रमं संयोजनं कृत्वा लिखत।** **[3]**

(i) औषधं खादित्वा पुत्रः नीरोगः अभवत्।

(ii) एकस्मिन् ग्रामे एका माता निवसति स्म।

(iii) माता स्वपुत्रं माधवं चिकित्सालयं नीतवती।

(iv) तस्याः माधवः नामकः पुत्रः आसीत्।

(v) चिकित्सकः माधवाय औषधं दत्तवान्।

(vi) एकदा माधवः ज्वरपीड़ितः अभवत्।

अथवा

**अधः मञ्जूषायां प्रदत्तशब्दानां सहायतया 'आचारः परमो धर्मः इति विषये षट्-संस्कृतवाक्येषु एकम् अनुच्छेदं लिखत।**

(मानवजीवने, सर्वोपकारकः, अलौकिकी-उन्नतिः, प्रतिष्ठा, गौरवम्, गुरुजनानाम्)